International Journal of Research in Social Sciences
Vol. 10 Issue 07, July 2020,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# पाणिनीयव्याकरणे वर्णोच्चारणोपक्रमः

- डॉ. जयप्रकाश साहु
अतिथि-अध्यापक:
संस्कृतविभाग:
ओडिशाकेन्द्रियविश्वविद्यालय:, कोरापुट

अष्टाध्यायी जगन्माताऽमरकोषो जगत्पिता इति प्रसिद्धा गभीरार्थवती लोकोक्तिरियम् अष्टाध्यायीग्रन्थस्य सर्वजनीनं महत्वं प्रतिपादयति । अष्टाध्यायीपठनपाठन-परम्परा सूत्रक्रमानुसारिणी, प्रक्रियाक्रमानुसारिणी शब्दरूप-धातुरूपादिसाधनोपयोगिसन्ध्यादिक्रमेण चेति द्विधा विभज्यते । लघुसिद्धान्तकौमुदी प्रक्रियाक्रमे अन्तर्भवति ।

**सन्दर्भः -**

भट्टोजिदीक्षितविरचित-सिद्धान्तकौमुद्यां संज्ञाप्रकरणे तुल्यास्यप्रयत्नं सवर्णम् इति सूत्ररत्नम् अवधार्यते । सूत्रव्याख्यानवेलायां सूत्रवृत्यन्ते अकारादीनाम् उच्चारणस्थानानि अभिहितानि; तानि अविकलरूपेण आचार्यवरदराजेन लघुसिद्धान्तकौमुद्यां प्रस्तुतानि ।

**स्पष्टीकरणम्-**

कायाग्निना प्रेरितः प्राणवायुः उरःस्थले ऊर्ध्वं संचरन् मुखे आगते सति, येन कण्ठताल्वादि-ध्वनियन्त्रेण बाधितस्सन् ध्वनिं जनयति; तत् स्थानं तस्य वर्णस्य उच्चारणस्थानम् इत्युच्यते । यथा अ- इत्यस्य उच्चारणं कण्ठात् भवति ; अतः अकारस्य स्थानं कण्ठः ।

**अष्टौ उच्चारणस्थानानि-**

अष्टौ स्थानानि वर्णानाम्
उरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च
नासिकोष्ठौ च तालु च ॥ **पा. शिक्षा.१३**

आधुनिकभाषावैज्ञानिकास्तु सप्तविंशत्यङ्गानि स्वीकुर्वन्ति वर्णोच्चारणस्य । - (**शब्दतत्वमाधुनिकविज्ञानश्च** - डॉ.रामनारायणदासः )

वर्णानाम् उच्चारणस्थानानि पाणिनीयशिक्षायां श्लोकमुखेन उच्यते-

कण्ठ्यावहाविचुयशा-
स्तालव्या ओष्ठजावुपु ।
स्युर्मूर्धन्या ऋटुरषा
दन्त्या लृतुलसाः स्मृताः ॥ **पा. शिक्षा.१७**

जिह्वामुले तु कुः प्रोक्ता
दन्त्योष्ठौ वः स्मृतौ ।
रा रो तु कण्ठतालव्या
ओ औ कण्ठोष्ठजौ स्मृतौ ॥ **पा. शिक्षा.१८**

वरदराजाचार्योऽपि भट्टोजीदीक्षितमनुसरन् वर्णानाम् उच्चारणस्थानानि अधोनिर्दिष्टरीत्या प्रस्तौति-

❖ **अकुहविसर्जनीयानां कण्ठः,**

| **वर्णाः** | **उदाहरणम्** | **स्थानम्** |
|---|---|---|
| I. अकारः | अष्टादशभेदाः | कण्ठः |
| II. कु= कवर्गः | क्, ख्, ग्, घ्, ङ्, | |
| III. हकारः | ह् | |
| IV. विसर्गः | उदाहरणं- अः, कः | |

विसर्गः स्वन्तन्त्ररूपेण नैव लिख्यते । विसर्गचिन्हम्- ः । उदाहरणम्- अ+विसर्गः = अः

कण्ठ्य- अ, क्, ख्, ग्, घ्, ङ् , ह् , विसर्गः एतेषां कण्ठस्थानम् । कण्ठमेव कण्ठ्यः ।

**नागेशभट्टस्तु-** अत्र कण्ठपदं कण्ठस्थानतत्समीपजिह्वामूलस्थानोभयपरम् इत्यभिप्रयति । विसर्गस्य लोकप्रसिद्धं लक्षणं यथा-

शृङ्गवत् वालवत्सस्य
कुमारीस्तनयुग्मवत् ।
नेत्रवत् कृष्णसर्पस्य
स विसर्ग उदीरितः ॥

स्थानविषयकविवेचनमपि यथा-

अवर्णस्य विसर्गश्च
हकारश्चापि केवलः ।
कण्ठ्या वर्णा स्मृता ह्येषां
हनुमध्यं तु कारणम् ॥

**(वर्णरत्नप्रदीपिकाशिक्षा)**

- विसर्गे वर्णो विसर्जनीयः कथ्यते । वि उपसर्गपूर्वकात् सृज् धातोः अनीयर् - प्रत्यये कृते सति विसर्जनीयः पदं निष्पद्यते ।
- वायोः विसर्जनेन जन्यत्वाद् विसर्जनीयः इति प्रोक्तम् । (**वैदिकाभरण** मैसूर संस्कृतग्रन्थमाला)

❖ **इचुयशानां तालु**

| | **वर्णाः** | **उदाहरणम्** | **स्थानम्** |
|---|---|---|---|
| i. | इकारः | क् + इ=कि | |
| ii. | चु= चवर्गः | च्, छ्, ज्, झ्, ञ्, | तालु |
| iii. | यकारः | य् | |
| iv. | शकारः | तालव्यशकारः | |

तालव्य - इ, च्, छ्, ज्, झ्, ञ्, य् , श् एतेषामुच्चारणस्थानं तालु वर्तते ।

❖ **ऋटुरषाणां मूर्धा -**

| | **वर्णाः** | **उदाहरणम्** | **स्थानम्** |
|---|---|---|---|
| i. | ऋकारः | क्+ऋ=कृ | |
| ii. | टु= टवर्गः | ट्, ठ्, ड्, ढ्, ण्, | |
| iii. | रेफः | गा+र्+ग्+यः= गार्ग्यः | मूर्धा |
| iv. | षकारः | मूर्धन्यषकारः | |

मूर्धन्य = ऋ, ट्, ठ्, ड्, ढ्, ण्, र्, ष् एतेषां पूर्वोक्तानाम् उच्चारणस्थानं मूर्धा ।

❖ **ऌतुलसानां दन्ताः -**

| **वर्णाः** | **उदाहरणम्** | **स्थानम्** |
|---|---|---|
| I. लृकारः | लृ | |
| II. तु= तवर्गः | त्, थ्, द्, ध्, न् | |
| III. लकारः | ल् | दन्ताः |
| IV. सकारः | दन्त्यसकारः | |

दन्त्य = ऌ, त्, थ्, द्, ध्, न्, ल्, स्, एतेषामुच्चारणस्थानं दन्ताः।

❖ **उपूपध्मानीयानाम् ओष्ठौ -**

| **वर्णाः** | **उदाहरणम्** | **स्थानम्** |
|---|---|---|
| I. उकारः | उ | |
| II. पु= पवर्गः | प्, फ्, ब्, भ्, म् | ओष्ठौ |
| III. उपध्मानीयौ | ᳲ प्, ᳲ फ् | |

ओष्ठौ - उ,प्, फ्, ब्, भ्, म् एतेषामुच्चारणस्थानम् ओष्ठौ।

❖ **ञमङणनानां नासिका च -**

| **वर्णाः** | **स्थानम्** |
|---|---|
| I. ञ्, | तालु+नासिका |
| II. म्, | ओष्ठ+नासिका |
| III. ङ्, | कण्ठ+नासिका |
| IV. ण्, | मूर्धा+नासिका |
| V. न् | दन्ताः + नासिका |

ञ्, म्, ङ्, ण्, न् एतेषामुच्चारणस्थानम् नासिका अपि अस्ति।

❖ **एदैतोः कण्ठतालु -**

| **वर्णाः** | **स्थानद्वयम्** |
|---|---|
| I. ए | कण्ठ+तालु |
| II. ऐ | |

ए, ऐ एतयोः उच्चारणस्थानं कण्ठ + तालु ।

❖ **ओदौतोः कण्ठोष्ठम् -**

| **वर्णाः** | **स्थानद्वयम्** |
|---|---|
| I. ओ<br>II. औ | कण्ठ + ओष्ठ |

ओ, औ एतयोः उच्चारणस्थानं कण्ठ + ओष्ठौ ।

❖ **वकारस्य दन्तोष्ठम् -**

| **वर्णः** | **स्थानद्वयम्** |
|---|---|
| वकारः | व् दन्त + ओष्ठ |

व्- वर्णस्य उच्चारणस्थानं दन्त + ओष्ठ ।

❖ **जिह्वामूलीयस्य जिह्वामूलम् -**

श्लोकसिद्धान्तकौमुदिकारः जिह्वामूलीयम् उपपध्मानीयञ्च वैज्ञानिकदृष्ट्या विवेचयति-

ᳵ गजकुम्भाकृतिः शास्त्रे
जिह्वामूलीयमुच्यते ।
इन्द्रवज्राकृतिचिन्हम्
उपध्मानीयमुच्यते ।

❖ **नासिका अनुस्वारस्य –**

| **वर्ण** | **उदाहरणम्** | **स्थानम्** |
|---|---|---|
| अनुस्वारः | अ+अनुस्वारः = अं | नासिका |

अनुस्वारविसर्गयोः व्यवहारः अत्यन्तसरलतया प्रोक्तं श्लोकसिद्धान्तकौमुद्याम्-

अनुस्वारो विसर्गश्च
स्वरात्परौ तु तिष्ठतः ।
अनुस्वारः शिरोबिन्दुः
पार्श्वे बिन्दु विसर्गकः ॥

(**श्लोकसिद्धान्तकौमुदी-** सुरेश झा)- संज्ञाप्रकरणम्

## उपसंहारः -

वर्णानामुच्चारणस्थानानि कण्ठ-तालु-मूर्धा-दन्त-ओष्ठ-नासिका-जिह्वामूल-उपध्मानीयानि इति पूर्वोक्तचर्चया पाणिनेरष्टाध्यायी वैज्ञानिकविवेचनया निकषोपलो विद्यते। किं बहूना, पाश्चात्यः भाषाविज्ञानी लियोनार्ड ब्लूमफील्ड पाणिनीम् इत्थं प्रशंसयति-

"This grammar of Panini in one of the greatest monuments of human intelligence". (Language, Page-11)

## अनुशीलितग्रन्थाः-


1. **लघुसिद्धन्तकौमुदी** (बरदराजाचार्यः)
   - I. भौमी व्याख्या-भीमसेनशास्त्री
   - II. श्रीधरमुखोल्लासिनी टीका - श्री गोविन्दाचार्यः
   - III. चन्द्रकला व्याख्या - डॉ. अर्कनाथ चौधरी
   - IV. प्रकाशिका व्याख्या - डॉ. सत्यपाल सिंहः
2. वैयाकरणसिद्धन्तकौमुदी (भट्टोजिदीक्षितः)
   - I. बालमनोरमा टीका- वासुदेवदीक्षितः
   - II. तत्वबोधिनी टीका- ज्ञानेन्द्रसरस्वती
   - III. लक्ष्मीटीका- सभापतिशर्मोपाध्यायः
3. श्लोकसिद्धन्तकौमुदी- सुरेश झा
4. पाणिनीयशिक्षा- पाणिनिः ( शाम्भवी- अनुश्रुतिव्याख्ये ) डॉ. शम्भुदयालपाण्डेयः, डॉ. सत्यप्रकाशदुबे
5. कौमुदीकल्पलतिका- शुक्लश्रीवेणीमाधवशस्त्री


****************************************